www.digitalsanskritguru.in
www.sanskritfromhome.in

# Samāsaḥ - The Science of Joining and Splitting words – An Introduction

By Vyoma Sanskrit Brothers - Venkat and Viswanathan

26th June 2018, 8.30 pm to 10.00 pm, San Jose

## || समासः – परिच्चयः ||



VYOMA
Sanskrit
Learning model
vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology
1
2
3
शास्त्राध्ययनम्
śāstrādhyayanam
ग्रन्थाध्ययनम्
granthādhyayanam
भाषाध्ययनम्
bhāṣādhyayanam
Experience bliss in the world of ancient knowledge
Achieve Mastery through textual understanding
Enjoy language learning with skills
Practice basics of Grammar




**Sanskrit Learning – Authentic, Affordable, Anytime, Anywhere, Engaging & Effective**
**Available in pen drive Also in www.digitalsanskritguru.com**

# वृत्तिः

- समुदायशक्त्या विशिष्ट-एकार्थप्रतिपादिका वृत्तिः ।
- वृत्तिः पञ्चधा ।

1. कृद्वृत्तिः - पचति इति पाचकः ।
2. तद्धितवृत्तिः - दशरथस्य अपत्यम् दाशरथिः ।
3. समासवृत्तिः - राज्ञः पुरुषः राजपुरुषः ।
4. एकशेषवृत्तिः - माता च पिता च पितरौ ।
5. सनाद्यन्तधातुवृत्तिः - पठितुम् इच्छति पिपठिषति ।

# विग्रहः

- वृत्त्यर्थावबोधकं वाक्यं विग्रहः ।
- विग्रहवाक्यावयवपदार्थेभ्यः परः, अन्यः योऽयं विशिष्टः एकार्थः, तत्प्रतिपादिका वृत्तिः ।

# समासः

- समसनं समासः ।
- अनेकस्य पदस्य एकपदीभवनं समासः इत्यर्थः ।
- उदा: सीतायाः पतिः सीतापतिः ।
- सीतायाः पतिः इति विग्रहः ।
- सीतापतिः इति समस्तं पदम् ।
- तत्पुरुषः इति समासः ।

# समाससम्बद्धाः केचन साधारणनियमाः

- सुबन्तानामेव समासः, न तु तिङन्तानाम्, न वा सुबन्तेन सह तिङन्तस्य ।
- कुम्भं करोति इत्यादिषु उपपदसमासेऽपि कुम्भशब्दस्य कृदन्तेन कारशब्देनैव समासः, न तु 'करोति' इति तिङन्तेन ।

- अस्य अपवादाः क्वचिद् विद्यन्ते -
- खादतमोदता (तिङन्तयोः समासः)
- एहियवम् (तिङन्तसुबन्तयोः समासः)

# समाससम्बद्धाः केचन साधारणनियमाः

- सामान्यतः युगपत् द्वयोः द्वयोः सुबन्तयोरेव समासः ।
- राजपुरुषागमनम्
- राज्ञः पुरुषः राजपुरुषः ।
- राजपुरुषस्य आगमनं राजपुरुषागमनम् ।

- द्वन्द्वे तु युगपद् बहूनामपि पदानां समासो भवितुम् अर्हति ।
- रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च रामलक्ष्मणभरतशत्रुघ्नाः ।

# समाससम्बद्धाः केचन साधारणनियमाः

- समर्थयोरेव समासः ।
- परस्परान्वितयोः सुबन्तयोः एव समासः इत्यर्थः ।
- राज्ञः पुत्रः राजपुत्रः ।
- यत्र परस्परान्वयो नास्ति, तत्र समासो न भवति ।
- उदा: भवति दर्शनं राज्ञः, पुत्रः चोरस्य धावति ।
- अत्र राज्ञः दर्शने अन्वयः, पुत्रस्य चोरे अन्वयः ।
- राजपदस्य पुत्रपदस्य च परस्परान्वयाभावात् न समासः ।

# पूर्वपदम् - उत्तरपदम्

- समस्तपदे पूर्वत्र श्रूयमाणं पदं पूर्वपदम्, उत्तरत्र श्रूयमाणं पदम् उत्तरपदम् ।
- उदा: चोरात् भयम् - चोरभयम् ।
- अत्र 'चोर' इति पूर्वपदम्, 'भय' इति उत्तरपदम् ।
- बहुत्र समासेषु पूर्वपदम् इदमेव भवेत् इति नियमो विद्यते ।
- उदा: राज्ञः पुत्रः - राजपुत्रः । पुत्रः राज्ञः - राजपुत्रः ।
- हरिश्च हरश्च - हरिहरौ । हरश्च हरिश्च - हरिहरौ ।

- क्वचित्तु उभयथा भवितुम् अर्हति ।
- कुक्कुटश्च मयूरी च - कुक्कुटमयूर्यौ । मयूरी च कुक्कुटश्च - मयूरकुक्कुटौ ।

# समासप्रक्रिया

- सुबन्तानामेव समासः ।
- समासे क्रियमाणे पूर्वोत्तरपदाभ्यां विद्यमाना सुब्विभक्तिः लुप्यते ।
- सीतायाः पतिः
- सीता ङस् (षष्ठीविभक्तिप्रत्ययः) पति सु (प्रथमाविभक्तिप्रत्ययः)
- सीतापति - समस्तपदम् ।
- समस्तपदात् पुनः सुब्-विभक्तिः योज्यते, अर्थम्, लिङ्गवचनादिकं च अनुसृत्य ।

# समासकरणे ज्ञातव्याः अंशाः

- समासविधायकं शास्त्रम् ।
  - गुरवे दक्षिणा गुरुदक्षिणा इति असाधुः, विधायकशास्त्राभावात् । गुरोः दक्षिणा गुरुदक्षिणा इत्येव समासः ।
- पूर्वपदनिर्णयः ।
  - हरिश्च हरश्च इति विग्रहे, हरश्च हरिश्च इति विग्रहे वा, हरिशब्द एव पूर्वत्र भवति समासे, हरिहरौ इति ।
- समस्तपदस्य लिङ्गनिर्णयः ।
  - त्रयाणां लोकानां समाहारः त्रिलोकी - समस्तपदं स्त्रीलिङ्गे भवति ।

- पूर्वपदे विशेषाः ।
  - दीर्घा रज्जुः दीर्घरज्जुः - स्त्रीलिङ्गे विद्यमानस्य पूर्वपदस्य पुंवद्भावः दृश्यते ।
  - राज्ञः पुत्रः - राजन् पुत्र - राजपुत्रः - पूर्वपदे नकारः लुप्यते ।
- उत्तरपदे विशेषाः ।
  - काश्याः राजा - काशीराजः - नकारान्तस्य 'राजन्' इत्यस्य अकारान्तत्वम् ।
  - सर्वा रात्रिः सर्वरात्रः - रात्रिशब्दस्य अकारान्तत्वं पुंलिङ्गत्वं च ।
- सन्धिप्रभृतीनि कार्याणि ।
  - गणानाम् ईशः गणेशः ।
  - समासे संहिता नित्या ।
- समस्तपदात् विभक्त्युत्पत्तिः ।

# समर्थः पदविधिः (२.१.१)

॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

- पदसम्बन्धी यो विधिः सः समर्थाश्रितो बोध्यः ।

- सामर्थ्यं द्विविधम्

1. व्यपेक्षा

- स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षादिवशाद् यः परस्परान्वयः तद् व्यपेक्षाभिधं सामर्थ्यम् ।
- सम्बद्धार्थः समर्थः ।
- वाक्ये व्यपेक्षाभिधं सामर्थ्यं भवेत् ।
- उदा: राज्ञः पुरुषोऽश्वश्च ।

2. एकार्थीभावः

- प्रक्रियादशायां प्रत्येकम् अर्थवत्त्वेन पृथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम् ।
- संसृष्टार्थः समर्थः ।
- वृत्तौ एकार्थीभावसामर्थ्यं दृश्यते ।
- पश्यति कृष्णं श्रितो देवदत्तम् ।
- वस्त्रं दशरथस्यापत्यं चैत्रस्य ।
- सुन्दर्याः सीतायाः पतिः ।
- ऋद्धस्य दशरथस्य अपत्यम् ।